अनुक्रमांक .............................  कूट सं. : 820133–$SA_1$(M)

कृपया जाँच कर लें कि इस प्रश्न–पत्र में कुल 21 प्रश्न हैं और कुल 11 मुद्रित पृष्ठ हैं।

# कक्षा - अष्टमी

# संस्कृतम्

## (सङ्कलनात्मकं मूल्याङ्कनम् - I)

निर्धारित–अवधिः - होरात्रयम्  पूर्णाङ्काः - 90

**निर्देशाः -**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एव लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसङ्ख्या अपि लेखनीया।

## खण्डः–'क' (अपठित–अवबोधनम्) (5)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –

मानवजीवने सफलतायै अनेकेषां गुणानाम् आवश्यकता भवति। परोपकारः, अनुशासनं, परिश्रमः इत्यादयः गुणाः उन्नत्यै अनिवार्याः भवन्ति। आपद्ग्रस्तानां सहायता रोगग्रस्तानां च सेवा दरिदान् प्रति दयाभावः इति अमूल्याः मानवीयगुणाः सन्ति। एवमेव अनुशासनम् अपि अद्वितीयः गुणः अस्ति। ये जनाः बाल्यकालात् एव अनुशासनं पालयन्ति ते जीवने पदे-पदे सफलतां लभन्ते। ते आत्मनः समाजस्य च सर्वविधाम् उन्नतिं कुर्वन्ति। आपद्ग्रस्तानां सहायतया रोगग्रस्तानां च सेवया मानवः पुण्यं प्राप्नोति, जीवने सुखम् उन्नतिं च लभते।

प्रश्नाः –

(I) एकपदेन उत्तरत –  ½×2=1

(i) जीवने सफलतायै केषाम् आवश्यकता भवति?

(ii) ये जनाः बाल्यकालात् अनुशासनं पालयन्ति ते किं लभन्ते?

(II) एकवाक्येन उत्तरत –  1×2=2

(i) अमूल्याः मानवीयगुणाः के सन्ति?

(ii) मानवः कथं पुण्यं प्राप्नोति?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – ½×4=2

(क) 'गुणानाम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(i) सफलतायै (ii) अनेकेषाम् (iii) आपद्ग्रस्तनाम् (iv) रोगग्रस्तानाम्

(ख) 'लभते' इति क्रियापदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(i) प्राप्नोति (ii) भवति (iii) पालयन्ति (iv) कुर्वन्ति

(ग) 'पालयन्ति' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

(i) अमूल्याः (ii) अनुशासनम् (iii) जनाः (iv) गुणाः

(घ) अवनतिम्? इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(i) सर्वविधाम् (ii) सफलताम् (iii) अनुशासनम् (iv) उन्नतिम्

## खण्डः-'ख' (रचनात्मक कार्यम्) (15)

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत – 1×5=5



**मञ्जूषा**

| |
|---|
| क्षेत्रम्, मेघाः, कृषकः, हलम्, कर्षति, गगने, वृक्षाः, खगाः, महिला, धान्यगुच्छानि, वृषभौ, कर्षतः, चालयति, अन्नानि, धारयति |

3. आपद्ग्रस्तानां सहायतायै उत्तराखण्डराज्यं गन्तुं अनुमतिं प्राप्तुं पितरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषातः उचितपदानि चित्वा पूरयन्तु पत्रं च उत्तरपुस्तिकायां लिखन्तु। ½×10=5

(i) ..............................

हैदराबादनगरम्

(आन्ध्रप्रदेशः)

तिथिः ..............................

सेवायाम्

परमादरणीयाः (ii) ..........................

सादरं प्रणामाः।

अत्र (iii) .......................... तत्रास्तु। भवन्तः जानन्ति एव यत् (iv) .......................... भीषणा प्राकृतिकी आपद् आगता। अनया आपदा महती जनहानिः धनहानिः च अभवत्। (v) .......................... सहायतायै मम विद्यालयतः एकं दलं तत्र गच्छति। अहम् अपि तैः सह गत्वा पीडितानां (vi) .......................... कर्तुम् इच्छामि। कृपया मह्यम् (vii) .......................... ददातु। विद्यालयस्य (viii) .......................... अपि अस्माभिः सह गमिष्यन्ति। मातृचरणेषु मम (ix) .......................... निवेदनीयाः।

भवदीयः पुत्रः

(x) ..........................

**मञ्जूषा :** कुशलं, राघवः, परीक्षाभवनम्, प्रणामाः, पितृमहोदयाः, अध्यापकाः, सेवाम्, अनुमतिं, उत्तराखण्डराज्ये, पीडितानाम्।

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत – ½×10=5

माता – पुत्र! कुत्र गन्तुं सज्जः भवसि?

पुत्रः – मातः! अहं पादपशालां (पौधशालां) गच्छामि।

माता – तत्र किमर्थं (i) ........................?

पुत्रः – मातः! अहं (ii) ........................ आनेतुं तत्र गच्छामि।

माता – त्वं पादपैः किं (iii) ........................?

पुत्रः – अहं (iv) ........................ पादपान् आरोपयिष्यामि।

माता – पुत्र! अस्माकं गृहे तु (v) ........................ एव न अस्ति। पादपान् कुत्र आरोपयिष्यसि?

पुत्रः – मातः! पुष्पकुण्डेषु (गमलों में) एव वयं पादपान् (vi) ........................।

माता – बाढम्। एतत् तु मया चिन्तितम् एव न।

पुत्रः – एते पादयाः (vii) ........................ शुद्धिं कुर्वन्ति। वायोः प्रदूषणं दूरीकुर्वन्ति।

माता – शोभनम्। पादपानां कृते एतानि (viii) ........................ स्वीकुरु।

पुत्रः – नहि मातः! रूप्यकाणाम् (ix) ........................ नास्ति। प्रशासनं निःशुल्कम् एव पादपान् वितरति।

माता – पुत्र! अतीव शोभनः तव विचारः। वयं सर्वे एव पर्यावरणं प्रति (x) ........ ................ भवेम।

**मञ्जूषा**

| |
|---|
| आवश्यकता, गृहे, जागरूकाः, गच्छसि, रुप्यकाणि, पादपान्, वातावरणं, स्थानम्, करिष्यसि, आरोपयिष्यामः |

## खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्) (35)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत – 1×3=3

(i) सत्सङ्गतिः <u>मान+उन्नतिं</u> करोति।

(ii) नागरिकः <u>मासानन्तरं</u> पुनः महात्मानं निमन्त्रयति।

(iii) प्रातः काले <u>सूर्य+उदयः</u> भवति।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – ½×6=3

(क) ........................ बहूनि कुसुमानि विकसन्ति।

(i) लताम् (ii) लताभिः (iii) लतायाम् (iv) लताः

(ख) ........................ तटेषु महानगराणां विकासः अभवत्।

(i) नदीनाम् (ii) नदीभिः (iii) नदीः (iv) नदीभ्यः

(ग) ईश्वरः ........................ जीवने सफलतां यच्छतु।

(i) भवन्तम् (ii) भवते (iii) भवान् (iv) भवता

(घ) विद्यालयात् गृहं ......................... छात्राः बसयानम् आरोहन्ति।

(i) गच्छन् (ii) गच्छन्तौ (iii) गच्छता: (iv) गच्छन्त:

(ङ) भरतः ......................... अनुजः आसीत्।

(i) रामस्य (ii) रामे (iii) रामाय (iv) रामः

(च) उद्याने सर्वे वृक्षाः ......................... पूरिताः सन्ति।

(i) फलानि (ii) फलानाम् (iii) फलम् (iv) फलैः

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत – 1×3=3

(क) छात्राः ......................... कक्षासु संस्कृतम् पठेयुः।

(i) सर्वेषु (ii) सर्वासु (iii) सर्वस्याम् (iv) सर्वाः

(ख) मम मित्राणि अपि ......................... सह क्रीडन्ति।

(i) अहम् (ii) माम् (iii) मया (iv) मयि

(ग) ......................... परीक्षा कीदृशी अभवत्?

(i) यूयम् (ii) युष्माभिः (iii) त्वम् (iv) युष्माकम्

7. (अ) कोष्ठके प्रदत्तसङ्ख्यां संस्कृतपदेन रिक्तस्थानयोः लिखत – 1×2=2

(क) कक्षायां ............................... (24) कन्याः सन्ति।

(ख) उद्याने ............................... (46) वृक्षाः सन्ति।

(आ) उचितं सङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत – ½×2=1

(क) ......................... मित्राणि मिलित्वा पठन्ति।

(i) त्रयः (ii) तिस्रः (iii) त्रीणि (iv) त्रि

(ख) ......................... कन्या उद्याने पुष्पाणि चिनोति।

(i) एकः (ii) एका (iii) एकया (iv) एकम्

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत – 1×3=3

(i) छात्राः कक्षायां कोलाहलं ......................... कुर्वन्तु।

(ii) अध्ययनकाले छात्राः ......................... न भ्रमेयुः।

(iii) ......................... वर्षा भवति तदा कृषकाः प्रसन्नाः भवन्ति।

**मञ्जूषा** – | यदा, मा, इतस्ततः |

9. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत – 1×3=3

(i) नृपः सिंहासनम् <u>अधितिष्ठति</u>।

(ii) मालाकारः उद्यानात् पुष्पाणि <u>आ+नयति</u>।

(iii) परिश्रमी जनः सदा सुखम् <u>अनुभवति</u>।

10. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(i) परस्परं स्नेहेन वसन्तु, अलं <u>विवादेन</u>।

(ii) <u>ग्रामम्</u> परितः क्षेत्राणि सन्ति।

(iii) मानवः <u>परिश्रमं</u> विना विद्यां न लभते।

(iv) सः <u>कर्णाभ्यां</u> बधिरः अस्ति।

(v) छात्राः शिक्षकैः सह शैक्षिक-भ्रमणाय गच्छन्ति।

11. अद्योलिखितानां समस्तपदानां समासस्य नामानि लिखत – 1×3=3

(i) कृष्णार्जुनौ

(ii) क्रीडाक्षेत्रम्

(iii) पशुपक्षिणः

12. विकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – 1×5=5

(क) गतवर्षे वयं क्रीडाप्रतियोगितायै .........................।

(i) अगच्छन् (ii) अगच्छम् (iii) अगच्छाव (iv) अगच्छाम

(ख) छात्राः नवमकक्षायां संस्कृतं .........................।

(i) पठेयुः (ii) पठेत् (iii) पठेः (iv) पठेताम्

(ग) योग्याः छात्राः पुरस्कारं .........................।

(i) लप्स्येते (ii) लप्स्यध्वे (iii) लप्स्यन्ते (iv) लप्स्यते

(घ) यूयम् एतान् श्लोकान् .........................।

(i) स्मरन्तु (ii) स्मरत (iii) स्मराम (iv) स्मर

(ङ) बालः आकाशे चन्द्रं ध्यानपूर्वकं .........................।

(i) दृश्यते (ii) दर्शयति (iii) पश्यति (iv) पश्यसि

13. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत – 1×4=4

(i) क्रीडाक्षेत्रे धावन् बालकः पतति।

(ii) जयः उद्यानं गम्+क्त्वा व्यायामं करोति।

(iii) गोपालः प्रातः उत्+स्था+ल्यप् भ्रमणाय गच्छति।

(iv) महात्मनः सहनशीलतां दृष्ट्वा नागरिकः तस्य चरणयोः अपतत्।

## खण्डः-'घ' (पठित-अवबोधनम्) (35)

14. अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत – 5

गच्छति काले ग्रीष्मकालः समाप्तः। वर्षा ऋतुः च आगच्छत्। सर्वत्र हरीतिमा आसीत्। चटका नवीनं गृहम् अरचयत्। तदैव सहसा अतिवृष्टिः अभवत्। काकस्य गृहं नष्टम् अभवत्। खिन्नः काकः शरणार्थं चटकायाः समीपम् अगच्छत्। चटका तस्य सहर्षं स्वागतं करोति। सर्वं च अवगम्य कथयति – "भ्रातः! चिन्तां मा कुरु। अहं सर्वम् अवगच्छामि। अहं तव प्रतीक्षायाम् आसम्। अन्तः आगच्छतु"

प्रश्नाः-

(I) एकपदेन उत्तरत – ½×2=1

(क) नवीनं गृहं का अरचयत्?

(ख) खिन्नः काकः किमर्थं चटकायाः समीपम् अगच्छत्?

(II) एक वाक्येन उत्तरत – 1×2=2

(क) चटका सर्वम् अवगम्य किम् अकथयत्?

(ख) कस्य गृहं नष्टम् अभवत्?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – ½×4=2

(क) 'गृहम्' इति पदस्य विशेषणपदं किम्?

(i) अरचयत् (ii) नवीनम् (iii) चटका (iv) सर्वत्र

(ख) 'खिन्नः काकः .................. अगच्छत्' अस्मिन् वाक्ये 'अगच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

(i) काकः (ii) खिन्नः (iii) शरणार्थं (iv) समीपम्

(ग) 'चटका तस्य सहर्षं स्वागतं .......' इति वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) चटकायै (ii) खिन्नाय (iii) काकाय (iv) गृहाय

(घ) 'दूरम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) स्वागतम् (ii) सहर्षम् (iii) शरणार्थम् (iv) समीपम्

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

प्रश्नाः –

(I) एकपदेन उत्तरत – ½×2=1

(i) धियः जाड्यं का हरति?

(ii) सत्सङ्गतिः दिक्षु कां तनोति?

(II) एकवाक्येन उत्तरत – 1×2=2

(i) सत्सङ्गतिः किं दूरीकरोति?

(ii) सत्सङ्गतिः केषां सर्वविधं कल्याणं करोति?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – ½×4=2

(क) 'वाण्याम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(i) सत्यम् (ii) दिक्षु (iii) वाचि (iv) चेतः

(ख) 'प्रसादयति' इति क्रियापदस्य कर्तृपदं किम्?

(i) चेतः (ii) पुंसाम् (iii) जाड्यम् (iv) सत्सङ्गतिः

(ग) 'अवनतिम्' इति पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(i) उन्नतिम् (ii) जाड्यम् (iii) पापम् (iv) सत्यम्

(घ) 'मनः' इति कस्य पदस्य अर्थः?

(i) वाचि (ii) चेतः (iii) दिक्षु (iv) कीर्तिम्

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

सर्वे छात्राः - (उत्थाय) हे आचार्य! संस्कृतदिवसे वयं भवन्तं वर्धापयामः।

आचार्यः - धन्यवादाः। स्वस्ति युष्मभ्यम्। शुभं भवतु संस्कृतदिवसः युष्मभ्यं सर्वेभ्यः।

प्रणवः - आचार्य! अद्य अस्माभिः संस्कृतविषये एका प्रश्नोत्तरी आयोजिता अस्ति।

सुमेधा - सम्पूर्णा कक्षा द्वयोः वर्गयोः विभक्ता अस्ति। एकः कालिदासवर्गः अपरः च भासवर्गः अस्ति।

प्रणवः - एकस्य प्रश्नस्य उत्तरं कालिदासवर्गः दास्यति। अपरं प्रश्नं च भासवर्गः उत्तरिष्यति।

आचार्यः - शोभनम्। अतीव सुन्दरम् आयोजनं कृतम्। अधुना प्रारम्भं कुर्वन्तु।

प्रणवः - संस्कृतम् इति पदस्य कः अर्थः?

विश्वासः - 'शुद्धम्' 'परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

प्रश्नाः-

(I) एकपदेन उत्तरत - ½×2=1

(i) अपरं प्रश्नं कः उत्तरिष्यति?

(ii) छात्रैः संस्कृतविषये का आयोजिता अस्ति?

(II) एकवाक्येन उत्तरत - 1×2=2

(i) संस्कृतम् इति पदस्य कः अर्थः?

(ii) आचार्यः छात्रेभ्यः आशीर्वादरूपेण किं कथयति?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – ½×4=2

(क) 'वर्धापयामः' इति क्रियापदस्य कर्तृपदं संवादे किं प्रयुक्तम्?

(i) भवन्तम् (ii) आचार्यः (iii) वयम् (iv) छात्राः

(ख) 'प्रश्नस्य' इति पदस्य विशेषणपदं संवादे किं प्रयुक्तम्?

(i) एकम् (ii) एकस्य (iii) उत्तरम् (iv) दास्यति

(ग) 'स्वस्ति युष्मभ्यम्' अत्र 'युष्मभ्यम्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(i) छात्रेभ्यः (ii) अध्यापकेभ्यः (iii) वर्गेभ्यः (iv) जनेभ्यः

(घ) 'समाप्तम्' इति पदस्य विलोमपदं संवादे किं प्रयुक्तम्?

(i) अधुना (ii) आयोजनम् (iii) शोभनम् (iv) प्रारम्भम्

17. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत – 1×4=4

(अ) सर्वे भवन्तु सुखिनः।

भावार्थः– अस्मिन् संसारे सर्वे (i) .................... प्राप्नुयुः इति एव अस्माकम् इच्छा अस्ति। अस्मिन् संसारे कोऽपि दुःखी न (ii) ....................। सर्वे सुखयुक्ताः भवेयुः।

(आ) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

भावार्थः– अस्माकं शत्रुः अस्माकं शरीरे एव अस्ति। एषः शत्रुः कः? (i) ................। आलस्यम् एव वस्तुतः अस्माकं (ii) .................... अस्ति। अतः आलस्यं मा कुरुत।

**मञ्जूषा** – | शत्रुः, सुखं, भवेत्, आलस्यम् |

18. अधोलिखितौ श्लोकौ पठित्वा अन्वये रिक्तस्थानानि पूरयत – ½×8=4

(अ) निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात्पथः प्रविचलन्ति पदं न धीराः।।

अन्वयः - नीतिनिपुणाः निन्दन्तु यदि वा (i) ................. लक्ष्मीः समाविशतु (ii) ................. वा गच्छतु, मरणम् अद्यैव अस्तु (iii) ................. वा, धीराः न्यायात् (iv) ................. पदं न प्रविचलन्ति।

(आ) गर्जति शरदि न वर्षति वर्षासु निःस्वनो मेघः।

नीचो वदति न कुरुते न वदति सुजनः करोत्येव।।

अन्वयः - मेघः शरदि (केवलं) (i) ................. वर्षति न। वर्षासु (सः) (ii) ................. (वर्षति)। नीचः वदति एव (iii) ................. न, सुजनः (iv) ................. वदति न।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - 1×5=5

(i) महात्मा विठोवा शान्तः एव अतिष्ठत्।

(ii) एकः नागरिकः महात्मानं भोजनाय निमन्त्रितवान्।

(iii) महात्मा विठोवा नगरात् बहिः कुटीरे अवसत्।

(iv) नागरिकः गृहम् आगतस्य महात्मनः स्वागतं न अकरोत्।

(v) भक्ताः तस्य दर्शनाय प्रतिदिनम् आगच्छन्ति स्म।

20. अधोलिखितेषु कथनेषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - 1×5=5

(i) नागरिकः <u>कार्येषु</u> संलग्नः आसीत्।

(ii) <u>चटकायाः</u> गृहं नष्टम् अभवत्।

(iii) <u>जलं</u> प्रदूषितं न करणीयम्।

(iv) नदी <u>पर्वतानाम्</u> उच्चेभ्यः स्थलेभ्यः निःसरति।

(v) <u>महात्मा</u> बुभुक्षितः अतिष्ठत्।

21. अधोलिखितानां पदानां समुचितार्थैः सह मेलनं कुरुत - ½×4=2

| | |
|---|---|
| (i) अनृतम् | नेत्रम् |
| (ii) लोचनम् | भाषते |
| (iii) धियः | असत्यम् |
| (iv) वदति | बुद्धेः |